# संस्कृतवार्ता:

दिनाङ्क :-  13/02/2025 सायम्  :- 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

<u>आदौ मुख्यवार्ताः</u>

- प्रधानमन्त्रिणः नरेन्द्रमोदिन: तथा च अमेरिकियराष्ट्रिय-गुप्तचरविभागस्य निदेशिकाया: तुलसी गबार्ड् इत्येतस्या: मध्ये अद्य वाशिङ्ग्टन् डी. सी. नगरे द्वयोः राष्ट्रयोः मध्ये गुप्तचर-सहकारं सुदृढीकर्तुं चर्चा जाता ; वाशिङ्गटन डी.सी. इत्यत्र अद्य राष्ट्रपतिना ट्रम्पेन सह प्रधानमन्त्री मोदी द्विपक्षीयवार्ता: करिष्यति।
- चतुर्विंशत्यधिक-द्विसहस्रतमवर्षस्य वक्फ् (संशोधनम्) विधेयकमभिलक्ष्य संयुक्तसमिते: प्रतिवेदनम् अद्य विपक्षस्य विरोधस्य मध्ये राज्यसभाया: पुर: स्थापितम्।
- आगामिषु दिनेषु विविधाः राष्ट्रियनिवृत्ति-वित्तयोजनाः एकछत्रे आनेतुं प्रशासनं कार्यं कुर्वन् अस्ति।
- भारतऋतुविभागेन अरुणाचलप्रदेशे, असमराज्ये, मेघालये च श्वः पर्यन्तं निम्नवृष्ट्या सह हिमपातस्य च पूर्वानुमानं प्रकटितम् अस्ति।
- भारतीयसुपरलीग-पादकन्दुक-क्रीडायाम् अद्य जमशेदपुरनगरस्य जेआरडी टाटाक्रीडासङ्कुले नॉर्थईस्ट् युनाइटेड् एफसी दलं जमशेदपुर एफसी इत्येतत् दलं सम्मुखीकरिष्यति।

-----------------------------------

प्रधानमन्त्री

प्रधानमन्त्री नरेन्द्रमोदी वाशिङ्गटन डी.सी. इत्यत्र अमेरिकाया: राष्ट्रपतिना ट्रम्पेन सह सीमित-प्रतिनिधिमण्डल-स्तरयो: प्रारूपे द्विपक्षीयवार्ता: करिष्यति। श्रीमोदी अमेरिकाया: प्रशासनस्य वरिष्ठजनै:, व्यापारिकनेतृभि:, भारतीयसमुदायस्य सदस्यै: च सह वार्तां करिष्यति। प्रधानमन्त्री नरेन्द्रमोदी फ्रांसस्य सफलयात्राया: अनन्तरम् अद्य प्रात:काले वाशिङ्गटननगरं सम्प्राप्तवान्। अमेरिका-देशे भारतस्य राजदूतः विनयमोहन-क्वात्रा, अन्ये च अधिकारिणः विमानस्थानके प्रधानमन्त्रिणं मोदिनं स्वागतं कृतवन्तः। भारतीयसमुदायस्य सदस्याः ब्लेयर्-हाउस इत्यस्मात् बहिः मिलित्वा श्रीमोदी-वर्यस्य स्वागतम् अकुर्वन्, श्रीमोदी अमेरिकादेशस्य राष्ट्रपते: डोनाल्ड् ट्रम्पस्य द्वितीय-कार्यकालस्य उद्घाटनस्य अनन्तरं संयुक्तराज्यामेरिका-देशस्य कतिपयेषु विश्वनेतृषु अन्यतमः अस्ति।

प्रधानमन्त्रिणः नरेन्द्रमोदिन: तथा च अमेरिकियराष्ट्रिय-गुप्तचरविभागस्य निदेशिकाया: तुलसी गबार्ड् इत्येतस्या: मध्ये अद्य वाशिङ्ग्टन् डी. सी. नगरे द्वयोः राष्ट्रयोः मध्ये गुप्तचर-सहकारं सुदृढीकर्तुं चर्चा जाता। चर्चा द्वैपाक्षिक-गुप्तचर-सहकारं वर्धयितुं, विशेषतः आतंकवाद-निरोधे, आन्तर्जालिकापराध-सुरक्षायां, उदयोन्मुख-विभीषिकासु, सामरिक-गुप्तचर-आदानप्रदाने च विषयेषु केन्द्रितास्ति। सुरक्षितं, स्थिरं, नियम-आधारितं च अन्ताराष्ट्रिय-व्यवस्थायाः प्रति स्वस्य प्रतिबद्धतां पुनः दृढीकर्तुं, तौ पारस्परिक-हितस्य क्षेत्रीय-वैश्विक-विकासविषये अपि विचारान् आदानप्रदानम् अकुरुताम्।

विमानपत्तनात् अवतरणानन्तरं सामाजिक-संचारपटले श्रीमोदी अवदत् यत्, सः अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्पेन सह मिलितुं, भारत-अमेरिका-समग्र-वैश्विक-सामरिक-सहभागितां निर्मातुं च उत्सुको वर्तते इति।

-----------------------------------

वक्फ

चतुर्विंशत्यधिक-द्विसहस्रतमवर्षस्य वक्फ् (संशोधनम्) विधेयकमभिलक्ष्य संयुक्तसमिते: प्रतिवेदनम् अद्य विपक्षस्य विरोधस्य मध्ये संसद: द्वयो: सदनयो: पुर: स्थापितम्। अपराह्ने द्विवादने स्थगनानन्तरं यदा लोकसभा पुन: आरब्धा तदा संयुक्तसमिते: अध्यक्षा जगदम्बिका पॉल् सदने प्रतिवेदनं उपस्थापितवती। विपक्षिसदस्या: कोलाहलं कृतवन्त: । इत: प्राक् विधयकेऽस्मिन् विपक्षिदलानां कोलाहलकारणात् लोकसभा मध्याह्नं द्विवादनं यावत् स्थगितमासीत्।

-----------------------------------

आरएस-पेंशन

आगामिषु दिनेषु विविधाः राष्ट्रियनिवृत्ति-वित्तयोजनाः एकछत्रे आनेतुं प्रशासनं कार्यं कुर्वन् अस्ति। अद्य राज्यसभायां पूरक-प्रश्नानाम् उत्तरं ददता केन्द्रीयमन्त्रिणा डॉ. मनसुख मण्डाविया इत्यनेन उक्तं यत् जनानां कृते विशेषतया असङ्घटितक्षेत्रेषु स्थितानां कृते नैकाः निवृत्ति-वित्तयोजनाः उपलभ्यन्ते। एतासु योजनासु अटल-पेन्शन-योजना, पीएम-श्रमिक-मन्थनं, पीएम-श्रमयोगि-मन्थनं च सम्मिलिताः सन्ति।

-----------------------------------

महाकुम्भ

सम्प्रति महाकुम्भवार्ता:

*सामाजिक-सञ्चारपटलस्य-निरीक्षणावधौ, उत्तरप्रदेशस्य आरक्षकैः एतादृशानि सप्त-सामाजिक-सञ्चारपटलानि समीभूतानि, यानि पुरातनमेकं दृश्य-श्रव्य-चलचित्रं महाकुम्भेन सह योजयित्वा मिथ्या-वार्ताः प्रसारयन्ति स्म। आरक्षकैः स्पष्टीकृतं यत् एतत् दृश्य-श्रव्य-चलचित्रं वस्तुतः एकविंशत्यधिक-द्विसहस्र-तमवर्षस्य गाजीपुरस्य सम्बद्धं वर्तते, यत्र नगरस्य नदीतीरे मृतशरीराणि प्राप्तानि आसन्। आरक्षिबलेन कथितं यत् ते राज्यप्रशासनस्य, आरक्षकाणां च छविम् कलुषितं कुर्वन्ति सहैव समाजे द्वेषमपि प्रसारयन्ति। अस्मिन् विषये प्रयागराजस्य कोटवाली-कुम्भ-मेलकारक्षक-स्थानके प्रकरणं पञ्जीकृतम् अस्ति। एतत् मिथ्या-दृश्य-श्रव्य-चलचित्रम् अनावरणं कुर्वन् आरक्षकाः स्पष्टीकृतवन्तः यत् एतत् महाकुम्भेन सह भ्रामकतया*

*सम्बद्धम्। कुम्भ-मेलकारक्षकाणां आधिकारिक-पटलेन अपि एतस्य निराकरणं कृतम्। प्रशासनेन स्पष्टीकृतं यत् महाकुम्भसम्बद्धां कस्यापि भ्रामकसूचनां न सोढुं शक्यते। ये सामाजिक-सञ्चार-पटलमाध्यमेषु उपश्रुतिं प्रसारयन्ति, तेषां विरुद्ध्य कठोरं विधि-कार्यं भविष्यति। प्रयागराजनगरे महाकुम्भस्य समये जनान् भ्रामकस्थितेः, दुष्प्रचारात् च रक्षितुं प्रयतमानाः उत्तरप्रदेशस्य आरक्षकाः कठोरकार्याणि कुर्वन्तः सन्ति। महानिदेशकः प्रशान्तकुमारः अवदत् यत् उत्तरप्रदेशस्य मुख्यमन्त्रिणः योगी आदित्यनाथस्य दिङ्निर्देशानुसारं सामाजिक-माध्यमेषु एतादृशानां पटल-विशेषाणां परिचयं कृत्वा कार्यम् क्रियते यत् महाकुम्भस्य विषये मिथ्या-वार्ताः प्रसारयन्ति इति। संस्कृतवार्ताकिक्षतः, ऋचा झा।*

------------------------------------

विश्व-रेडियो-दिवस

अद्य सम्पूर्णे विश्वे विश्व-रेडियो-दिवस: आमान्यते। प्रतिवर्षं फरवरी-मासस्य त्रयोदश-दिनाङ्के आचार्यमाणस्य अस्य-दिवसस्य उद्देश्यं, रेडियो इत्येतस्य महत्वविषये जागरूकताया: वर्धनं वर्तते। अस्य वर्षस्य विषयो वर्तते 'रेडियो ऋतुदशा परिवर्तनञ्च'। प्रधानमन्त्रिणा नरेन्द्रमोदिना विश्वरेडियो-दिवसावसरे शुभकामना: प्रदत्ता:।

सूचनाप्रसारणसचिव: सञ्जय-जाजू अद्य नवदिल्ल्यां अस्य वर्षस्य रेडियोमहोत्सवस्य उद्घाटनं कृतवान्। अस्मिन् अवसरे श्री जाजू वर्य: उक्तवान् यत-आकाशवाणी विश्वस्य बृहत्तमासु प्रसारणसंस्थासु अन्यतमा अस्ति

अस्मिन्-अवसरे आकाशवाण्या: महानिदेशिका डॉ० प्रज्ञा पालीवाल् गौड् उक्तवती यत् आकाशवाणी सर्वदा ऋतुदशापरिवर्तन-विषये जनानां कृते जागरूकतोत्पादनाय प्रतिबद्धा अस्ति।

------------------------------------

भूकम्प

भूकम्पस्य समाह्वान-निवृत्ति-तन्त्रं सुदृढं कर्तुं बहुपक्षीय-रणनीतिं स्वीक्रियते इति अद्य प्रशासनेन उक्तम्। पूरकप्रश्नानाम् उत्तरं ददता पृथिवी-विज्ञानमन्त्रिणा डॉ. जितेन्द्रेण उक्तं यत् प्रशासनेन हिमालये अन्यत्र च पूर्वसञ्चेतना प्रणाली स्थापिता सन्ति।

मन्त्री अवदत् यत् यद्यपि भूकम्पस्य पूर्वमेव पूर्वानुमानं कर्तुं सर्वदा न शक्यते तथापि प्रशासनं समाह्वानान् निवारणाय प्रौद्योगिक्यादि-उपायानां उपयोगं कुर्वन् अस्ति।

---

ऋतु

भारतऋतुविभागेन अरुणाचलप्रदेशे, असमराज्ये, मेघालये च श्वः पर्यन्तं निम्नवृष्ट्या सह हिमपातस्य च पूर्वानुमानं प्रकटितम् अस्ति। सहैव अद्य अरुणाचलप्रदेशस्य केषुचित् भागेषु अत्यधिकवृष्टेः सम्भावना प्रकटितास्ति। ऋतुविभागेन उक्तं यत् श्वः यावत् नागालैण्डे, मणिपुरे, मिजोरमे, त्रिपुरायां तथा उपहिमालयीय-पश्चिमबङ्गे सिक्किमे चापि निम्नवृष्टिः सम्भावितास्ति। विभागेन उक्तं यत् उपहिमालयीय-पश्चिमबङ्गे सिक्किमे च एकान्तक्षेत्रेषु शनिवासरपर्यन्तं प्रातःकाले सघननीहारस्य स्थितिः निरन्तरं प्रचलिष्यति।

---

फुटबॉल

भारतीयसुपरलीग-पादकन्दुक-क्रीडायाम् अद्य जमशेदपुरनगरस्य जेआरडी टाटाक्रीडासङ्कुले नॉर्थईस्ट् युनाइटेड् एफसी दलं जमशेदपुर एफसी इत्येतत् दलं सम्मुखीकरिष्यति। द्वन्द्वं सायं सार्ध-सप्तवादने आरप्स्यते।

।। इति वार्ता:।।